॥ सन्तान गोपाल


२७६६

विधानम्॥

॥ श्रीगा[illegible] यनमः॥

॥ सन्तानगोपालविधानं ॥

॥ संतानगोपाल विधानं प्रारभ्यते ॥


B.B.

॥ श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥
अथ सन्तानगोपालमन्त्रविधानं लिख्यते ॥
तत्र पूर्वं अर्घबन्धनम् ॥ शान्तिपाठं कृत्वा ॥
शुभशान्तिर्भवतु अस्तु ॥ आचमनम् ॥
प्राणायामम् ॥ सुमुखश्चैकदन्तश्चेति पठि-
त्वा ॥ इह भुवनकोशे इत्यादि तिथौ ॥ मम
अष्टौ वन्ध्यादिदोषपरिहारार्थं मृतापत्यदोष-

निवारणार्थं जीवितपुत्रफलप्राप्त्यर्थं सर्वसौ-
ख्यफलप्राप्त्यर्थं श्रीसंतानगोपालमन्त्रजप-
प्रारंभनिमित्तं ब्राह्मणानां वरणमहं करि-
ष्ये ॥ इति ब्राह्मणवरणम् ॥ स्वयं पादप्र-
क्षालनं वरणश्राद्धम् ॥ सर्वऋत्विग्भिः स्व-
स्तिवाचनम् ॥ ततो भूतशुद्ध्यादिप्राणप्र-
तिष्ठा ॥ अन्तर्मातृका अजपा बहिर्मातृका

सं० १

केशवादिमातृका मन्त्रन्यासं कुर्यात् ॥ तद्य-
था ॥ अस्य श्रीसन्तानगोपालमन्त्रस्य भग-
वन्नारदऋषये नमः शिरसि ॥ अनुष्टुप्-
छन्दसे नमः मुखे ॥ सन्तानगोपालश्रीकृ-
ष्णदेवतायै नमः हृदि ॥ ॐ क्लीं बीजाय
नमः नाभौ ॥ ॐ ह्रीं शक्तये नमः पादयोः ॥
सन्तानगोपालप्रीत्यर्थे जपे विनियोगाय

सं० नमः सर्वाङ्गे ॥ ॐ क्लीं अंगुष्ठाभ्यां नमः ॥ मं०
२ ॐ देवकीसुत गोविंद तर्जनीभ्यां नमः ॥
ॐ वासुदेव जगद्गुरो मध्यमाभ्यां नमः ॥
ॐ देहि मे तनयं कृष्ण अनामिकाभ्यां
नमः ॥ ॐ त्वामहं शरणं गत इति कनिष्ठि-
काभ्यां नमः ॥ ॐ देवकीसुत गोविन्द २
वासुदेव जगद्गुरो ॥ देहि मे तनयं कृष्ण

त्वामहं शरणंगत इति करतलकरपृष्ठाभ्यां नमः॥ ॐ क्लीं हृदयाय नमः॥ ॐ देवकीसुत गोविन्द शिरसे स्वाहा ॥ ॐ वासुदेव जगद्गुरो शिखायै वषट् ॥ ॐ देहि मे तनयं कृष्ण कवचाय हुं ॥ ॐ त्वामहं शरणं गतः नेत्रत्रयाय वौषट् ॥ ॐ देवकीसुत गोविन्द वासुदेव जगद्गुरो ॥ देहि मे तनयं कृष्ण

सं० त्वामहं शरणं गतः॥ अस्त्राय फट्॥ ततोऽ- सं०
३ क्षरन्यासः ॐ दें नमः शिरसि ॥ ॐ वं
नमः मुखवृत्ते। ॐ कीं नमः दक्षभ्रुवे ॥ ॐ
सुं नमः वामभ्रुवे॥ ॐ तं नमः दक्षनेत्रे॥ ॐ
गों नमः वामनेत्रे ॐ विं नमः दक्षकर्णे॥ ॐ दं
नमः वामकर्णे ॐ वां नमः दक्षनासापुटे॥ ॐ ३
सुं नमः वामनासापुटे॥ ॐ दें नमः दक्षगण्डे॥

ॐ वं नमः वामगण्डे॥ ॐ जं नमः ऊर्ध्वौष्ठे॥ ॐ गं नमः अधरोष्ठे ॥ ॐ ह्रुं नमः ऊर्ध्वदंतपंक्तिषु ॥ ॐ रों नमः अधोदंतपंक्तिषु ॥ ॐ दें नमः आस्ये ॥ ॐ हिं नमः दक्षकरमूले ॥ ॐ में नमः दक्षकूर्परे ॥ ॐ तं नमः दक्षमणिबन्धे ॥ ॐ नं नमः वामभुजमूले॥ ॐ यं नमः वामकूर्परे ॥ ॐ क्रुं नमः वाममणिबन्धे ॥ ॐ

षणं नमः दक्षपादमूले । ॐ त्वां नमः दक्ष-
पादजानुनि ॥ ॐ मं नमः दक्षपादगुल्फे ॥
ॐ हं नमः वामपादमूले ॥ ॐ शं नमः वा-
मपादजानुनि ॥ ॐ रं नमः वामपादगुल्फे ॥
ॐ णं नमः कण्ठे ॥ ॐ गं नमः हृदये ॥
ॐ तं नमः नाभौ ॥ इति अक्षरन्यासः ॥
अथ गोपालमन्त्रस्य हृदयादिन्यासः ॥ ॐ गों

ॐ नमः पराय पृथिव्यात्मने नमः पादयोः
ॐ पीं ॐ नमः पराय अबात्मने नमः गुह्ये ॥
ॐ जं ॐ नमः पराय तेजसात्मने नमः हृदि॥
ॐ नं ॐ नमः पराय वाय्वात्मने नमः मुखे ॥
ॐ वं ॐ नमः पराय आकाशात्मने नमः
मूर्ध्नि ॥ ॐ ह्लं ॐ नमः पराय अहंकारात्मने
नमः ॥ ॐ भां ॐ नमः पराय महदात्मने

सं० नमः द्वयं हृदि॥ ॐ यं ॐ नमः पराय प्रकृत्या- मं०
५ त्मने नमः॥ॐ स्वां ॐ नमः पराय पुरुषात्मने
नमः ॥ ॐ ह्रां ॐ नमः पराय परमात्मने
नमः॥ एतत्त्रयं सकलशरीरे व्यापकम्॥ इति
दशतत्वन्यासः॥ सृष्टिः॥विपरीता॥संहृतिः॥
ॐ यं ॐ नमः पराय प्रकृत्यात्मने नमः ॥ ५
ॐ स्वां ॐ नमः पराय पुरुषात्मने नमः ॥

ॐ ह्रांॐ नमः पराय परमात्मने नमः ॥
एतत्त्रयं सकलशरीरे व्यापकम् ॥ ॐ ह्लं ॐ
नमः पराय अहंकारात्मने नमः ॥ ॐ भां
ॐ नमः पराय महदात्मने नमः ॥ द्वयं
हृदि ॥ ॐ वं ॐ नमः पराय आकाशात्मने
नमः मूर्ध्नि ॥ ॐ नं ॐ नमः पराय वाय्वा-
त्मने नमः मुखे ॥ ॐ जं ॐ नमः पराय

सं० तेजसात्मने नमः हृदि ॥ ॐ पीं ॐ नमः मं०
६ पराय वातात्मने नमः गुह्ये॥ ॐ गों ॐ नमः
पराय पृथिव्यात्मने नमः पादयोः ॥ इति
संहारतत्वन्यासः ॥ अथ ऋषिन्यासः ॥ ॐ
गोपालमन्त्रस्य ईश्वरऋषये अंगुष्ठाभ्यां-
नमः ॥ ॐ गायत्री छन्दसे तर्जनीभ्यां ६
नमः ॥ ॐ नारायणदेवतायै मध्य-

माभ्यां नमः ॐ गोपालकीलकाय अनामि-
काभ्यां नमः ॥ ॐ प्रेमभक्तिप्राप्त्यर्थे जपे
विनियोगाय कनिष्ठिकाभ्यां नमः ॥ मूल-
मन्त्रेण करतलकरपृष्ठाभ्यां नमः ॥ एवं
हृदयादिन्यासः ॥ ॥ ॐ ईश्वरऋषये नमः
हृदयाय नमः ॥ ॐ गायत्रीछन्दसे शिरसे
स्वाहा ॥ ॐ नारायणदेवतायै शिखायै वष-

स० ट् ॥ ॐ गोपालकीलकाय कवचाय हुं ॥ ॐ मं०
७ प्रेमभक्तिप्राप्त्यर्थे जपे विनियोगाय नेत्रत्र-
याय वौषट् ॥ मूलमन्त्रेण अस्त्राय फट्॥पुनः
मन्त्रेण व्यापकन्यासः ॥ अथ वर्णन्यासः ॥
ॐ ह्रीं मूर्ध्नि ॥ ॐ श्रीं भाले ॥ ॐ ह्रीं भ्रुवो-
र्मध्ये ॥ ॐ ह्रीं नेत्रयोः ॐ क्लीं कर्णयोः॥ ॐ ७
ङं नसोः ॥ ॐ ॐ आनने ॥ ॐ ॐ चिबुके ॥

ॐ गों कण्ठे॥ ॐ शः दोर्मूले॥ ॐ गों हृदि॥ ॐ पीं तुंडके॥ ॐ जं नाभौ॥ ॐ नं लिङ्गे॥ ॐ वं आधारे॥ ॐ ळं कट्याम्॥ ॐ भां जान्वोः॥ ॐ यं जङ्घयोः ॐ स्वां गुल्फयोः॥ ॐ हां पादयोः॥ इति वर्णन्यासः॥ ॥ अथ किरीटमुद्रालक्षणम्॥ ऊर्ध्वाग्राः करयोर्मध्ये कनिष्ठाङ्गुष्ठकाः क्रमात्॥योजयित्वा मिथोऽ-

प्यग्रेष्वान्तस्तर्जन्यनामिके॥ इति किरीटमु-
द्रालक्षणं ॥ अस्य मन्त्रेण दिग्बन्धः ॥ अथ
मूर्त्तिपञ्जरन्यासः ॥ ॐ अं ॐ रां कृष्णवर्णाय
केशवाय धात्रे नमः ललाटे ॥ ॐ आं नं
रां कनकवर्णाय नारायणाय अर्यम्णे नमो
नाभौ ॥ ॐ इं मों मां श्यामवर्णाय माध-
वाय मित्राय नमः हृदये ॥ ॐ ईं मं यं

कर्पूरवर्णाय गोविन्दाय वरुणाय नमः कण्ठे
ॐ उं गं णं रक्तवर्णाय विष्णवे अंशवे
नमः दक्षपार्श्वे ॥ ॐ ऊं वं मः धूम्रवर्णाय
मधुसूदनाय भगायनमः दक्षभुजमूले ॥
ॐ एं तें दां हरितवर्णाय त्रिविक्रमाय विव-
स्वते नमः दक्षकर्णे ॥ ॐ ऐं वां पिङ्गलव-
र्णाय वामनाय इन्द्राय नमः वामपार्श्वे ॥

सं० ॐ ॐ सुं मां अभ्रवर्णाय श्रीधराय पूष्णे मं०
९ नमः वामांसे ॥ ॐ ॐ देयं चित्रवर्णाय
हृषीकेशाय पर्जन्याय नमः वामकर्णे ॥
ॐ अं वां नं पाण्डुरवर्णाय पद्मनाभाय
त्वष्ट्रे नमः पृष्ठे ॥ ॐ अं यं मं अञ्जन-
वर्णाय दामोदराय विष्णवे नमः ककुदि ॥ ९
ॐ ॐ १२ नमः मूर्ध्नि ॥ ॐ श्रीं श्रीवत्साय

नमः वक्षसि ॥ इति मूर्तिपञ्जरन्यासः ॥
अथ ध्यानम् ॥ वक्ष्येऽक्षयधनावाप्त्यै प्रति-
पत्तिं श्रियःपतेः॥सुगुप्तां धननाथाद्यैर्यान्यैर्वा
क्रियते सदा ॥१॥ द्वारावत्यां सहस्रार्कभास्व-
रैर्भवनोत्तमैः॥अनल्पैःकल्पवृक्षैश्च परीते म-
णिमण्डपे॥२॥ ज्वलद्रत्नमयस्तम्भद्वारतोरण-
कुड्यके॥फुल्लस्रगुल्लसच्चित्रवितानालम्बिमौ-

सं० क्तिके ॥ ३ ॥ पद्मरागस्थलीराजद्रत्नद्याश्च मं०
१० मध्यतः ॥ अनारतगलद्रत्नसुमध्यस्रस्तब-
न्धनैः ॥ ४ ॥ रत्नप्रदीपावलिभिः प्रदीपि-
तद्दिगन्तरे ॥ उद्यदादित्यसंकाशमणि-
सिंहासनाम्बुजे॥५॥ सामासीनोऽच्युतो ध्ये
यो तप्तहाटकसन्निभः ॥ समानोदितचन्द्रा- १०

र्कतडित्कोटिसमद्युतिः ॥६॥ सर्वाङ्गसुन्दरः

सौम्यः सर्वाभरणभूषितः॥ पीतवासाश्चक्र-
शङ्खगदापद्मोज्वलद्भुजः॥७॥ अनारतोज्ज्व-
लद्रत्नधारौघकलशं स्पृशन् ॥ वामपदाम्बु-
जाग्रेण मुष्णता पल्लवच्छविम् ॥ ८ ॥ रु-
क्मिणीसत्यभामेऽस्य मूर्ध्नि रत्नौघधारया ॥
सिञ्चन्त्यौ दक्षवामस्थे स्वदोस्थकलशो-
त्थया ॥ ९ ॥ नाग्निजिती सुनन्दा च दिशा-

न्त्यौ कलशौ तयोः ॥ ताभ्यां च दक्षवामस्थे
मित्रविन्दासुलक्ष्मणे ॥ १० ॥ रत्ननद्योः
समुद्धृत्य रत्नपूर्णौ घटौ तयोः ॥ जाम्बवती
सुशीला च दिशंत्यौ दक्षवामगे ॥ ११ ॥
बहिः षोडशसाहस्रसंख्याताः परितः प्रि-
याः ॥ ध्येयाः कनकरत्नौघधारायुक्कलशोज्ज्व-
लाः ॥ १२ ॥ तद्बहिश्चाष्टनिधयः पूरयन्तो

सं० ११

धनैर्द्धराम् ॥ तद्बहिर्द्दृष्णयः सर्वे पुरः सर्वे
सुरादयः ॥ १३ ॥ ध्यात्वैवं परमात्मानं विं-
शत्यन्तं मनुं जपेत् ॥ चतुर्लक्षं हुनेदाज्यै-
श्चत्वारिंशत्सहस्रकम्॥१४॥ शक्तिः श्रीपूर्व-
कोष्टादशार्णोविंशतिवर्णकः ॥ मन्त्रोऽनेन
सदृक्षोऽन्यो मनुर्नहि जगत्त्रये ॥ १५ ॥
अथ ध्यानम् ॥ अर्जुनस्य रथस्याग्रे शंखच-

सं० क्रादिधारिणम्॥ मेघश्यामं हंसवक्रं पीतकौ- मं०
१२ शेयवाससम् ॥ गतान् द्विजसुतान् सर्वान्
प्रत्यानीयागतं हरिम्॥ नीलोत्पलदलश्यामं
पीताम्बरयुगान्वितम् ॥ चतुर्भुजं शंखचक्रे
दधानं चोर्ध्वदोर्द्वये ॥ अधः पाणिद्वये वेणुं
वादयन्तं मुदान्वितम्॥ अनेकरत्नसम्बद्ध- १२
किरीटोज्ज्वलविग्रहम्॥ नानालङ्कारसुभगं

गरुडोपरि संस्थितम् ॥ वेदस्तोत्रपदैर्नित्यं मुनिभिः परिवेष्टितम् ॥ इति ध्यात्वा ॥ ततो स्थापनद्वारे द्वारपालपूजा ॥ तद्यथा ॥ आचमनं प्राणायामं देहल्यग्रे चतुरस्रं मण्डलं कृत्वा तत्र त्रिकोणं षट्कोणं कृत्वा तस्योपरि त्रिपदिकां स्थापयेत् ॥ अस्त्रमन्त्रेण साधारं पात्रं प्रक्षाल्य संस्थाप्य ॥ इ

सं० तिमन्त्रेण जलमापूर्य 'गङ्गेचयमुनेचे' ति पठि मं०
१३ त्वा ॥ अङ्कुशमुद्रां प्रदर्श्य ॥ ॐ इति गन्ध-
पुष्पाणि निःक्षिप्य ॥ प्रणवेन त्रिरभिमन्त्र्य
धेनुमुद्रां प्रदर्श्य ॥ तदुदकेन अस्त्रमन्त्रेण
द्वारशाखामभ्युक्ष्य ॥ गन्धपुष्पाद्यैर्द्वारदे-
वतां पूजयेत् ॥ तद्यथा ॥ द्वारस्योर्ध्वशाखा- १३
याम ॥ ॐ विघ्नराजाय नमः ॥ ॐ ॥

ऐं गं गणपतये नमः ॥ ॐ मं महालक्ष्म्यैः
नमः ॥ ॐ सं सरस्वत्यै नमः ॥ ॐ दं
दुर्गायै०॥दक्षिणशाखायाम्॥ ॐ विं विघ्नेशा
य०॥ वामशाखायाम् ॥ ॐ क्षं क्षेत्रपालाय
नमः ॥ ॐ ऐं द्वारश्रियै० ॥ दक्षिणे ॥ गंगा-
यै०॥ यमुनायै नमः अधोदेहल्याम् ॥ ॐ ऐं
वास्त्वाधिपतये नमः॥योगिनीभ्यो०॥ ऊर्ध्वे-

देहल्याम् ॥ ॐ ऐं रत्नमण्डपाय० ॥ इद-
मत्र चन्दनं च पुष्पं धूपदीपादिपूजन-
विधेः परिपूर्णमस्तु ॥ कृताञ्जलिः॥ मन्त्रम्॥
प्रारब्धं यन्मया कर्म यत्करिष्यामि शक्तितः
तत्सर्वं कृपया देव निर्विघ्नं कुरु मे प्रभो॥ इति
नमस्कारः॥ नैर्ऋत्यां ब्रह्मणे नमः॥वास्तुपुरु-
षाय नमः ॥ शंखनिधये नमः ॥ पद्मनि-

सं० १४

धये नमः ॥ ततो यन्त्रस्थापनम् ॥ पीतपट्टदुकूलोपरि मध्ये वृत्तं कुर्यात् ॥ मध्ये ॐ श्रीगोपालं आवाहयामि स्थापयामि ॥ इति प्रथमावरणं ॥ अथ द्वितीयावरणम् ॥ अष्टदले पूर्वादिप्रादक्षिण्येन स्थापयेत् ॥ ॐ रुक्मिणीं० ॐ सत्यभामां० ॐ जाम्बवतीं० ॐ नाग्नजितीं० ॐ कालिंदीं० ॐ मित्र-

सं० विदां० ॐ लक्ष्मणां० ॐ चारुहासिनीं० ॥ मं०
१५ इति द्वितीयावरणम् ॥ अथ तृतीयावरणम्
दशदले ॥ ॐ वसुदेवं आ० ॐ देवकीं आ०
ॐ नन्दं आ० ॥ ॐ यशोदां आ० ॥ ॐ
बलभद्रं आ० ॐ सुभद्रां आ० ॥ ॐ गो-
पान् आ० ॐ गोपीं आ० ॐ रोहिणीं आ० ॥ १५

ॐ देवेभ्यो नमः आ० ॥ इति तृतीया-

वरणम् ॥ अथ बहिश्चतुरस्रमध्ये ॥ ईशा-
नादि दिक्षु ॥ ऐश्वर्यं आ० ॥ ॐ अवैराग्यं
आ० ॥ ॐ अनैश्वर्यं आ० ॥ ॐ ज्ञानं आ०
॥ ॐ अधर्मं आ० ॐ धर्मं आ० ॥ ॐ
अज्ञानं आ० ॥ ॐ स्वस्वस्थाने इंद्रादिदश-
दिक्पालान् आ० ॥ ततो आयुधानि ॥
ततो वाहनानि ॥ ततो अष्टदिक्षु ग्रहान्

स्थापयेत्॥ततो मूर्तीनां वस्त्रोत्तारणं ॥ दश-
विधस्नानम् ॥ ततः प्रतिष्ठा ॥ इदमत्र चन्द-
नं च पुष्पम् ॥ ततो मूर्त्तेः षोडशोपचारैः
पूजनम् ॥ आवाहनादिस्नानान्ते पञ्चामृत-
स्नानम् ॥ मन्त्रेण धूपदीपफलार्घनैवेद्या-
रार्तिकं प्रदक्षिणानमस्कारस्तुतिपाठाः ॥
अर्घ्यपूर्वोऽस्तु० ॥ ततः पात्रस्थापनं कुर्यात् ॥

तत्रादौ शंखस्थापनम् ॥ त्रिकोणं मण्डलं विलिख्य ॥ तन्मध्ये नमः इति मन्त्रेण पुष्पं निधाय ॥ फट् इति मन्त्रेण त्रिपदिकां प्रक्षाल्य ॥ मं वन्हिमण्डलाय नमः इति त्रिपदिकां त्रिकोणे निधाय सं सोममण्डलाय नमः ॥ इति शंखं त्रिपदिकोपरि संस्थाप्य॥ अं अर्कमण्डलाय नमः ॥ इति शंखे तर्जन्यङ्गुष्ठाभ्यां

संन्यस्य ॥ ततो हृदयमन्त्रेण शंखे सुगन्ध-
पुष्पं निधाय ॥ इमं मे गङ्गे० इति ॥ इमा
आपः शिवाः सन्तु शुभाः शुद्धाश्च निर्म-
लाः ॥ पावनाः शीतलाश्चैव पूताः सूर्यस्य
रश्मिभिः ॥ इति जपित्वा ॥ प्रतिलोममातृ-
कया अथवा मूलमन्त्रेण शंखे जलं पूरये-
त् ॥ गन्धपुष्पैरभ्यर्च्य ॥ शंखजले पद्माय

नमः अनेन गन्धपुष्पादिकं सर्वं दत्वा ॥
तदुपरि अष्टधा संजप्य ॥ शंखाय नमः ॥
ततः पाद्यार्घ्याचमनीयमधुपर्कपात्रभोगपा-
त्राणि संस्थाप्य आत्मानं गन्धपुष्पाद्यैरभ्य-
र्च्य ॥ मूलेन हृदि आवाह्य ॥ मुद्राः प्रद-
र्श्य ॥ यथाशक्ति मूलं जप्त्वा ॥ नैवेद्यं ॥
मूलम् हंसः इतः पूर्वं प्राणबुद्धिदेहधर्मा-

सं० धिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा मं०
१८ वाचा हस्ताभ्यां उदरेण शिश्ना यत्कृतं तत्स
र्वं गुरुदेवतायै समर्पयामि ॥ इति समर्प्य ॥
मूलेन प्रणम्य ॥ इति अन्तर्यागं कृत्वा ॥
बहिर्यागं कुर्यात् ॥ तद्यथा—पूर्वं घृतयन्त्र-
स्याधः सिंहासनं ध्यात्वा ॥ तदुपरि उपरि १८
पूजयेत् ॥ तद्यथा मण्डूकादिपरतत्त्वान्तं ॥ मं

मण्डूकाय नमः॥ कं कालाग्निरुद्राय नमः॥आं
आधारशक्तये नमः ॥ कं कच्छपाय नमः ॥
धं धर्माय नमः॥ सुं सुधासिन्धवे ०॥श्वें श्वेत-
द्वीपाय ०॥सुंसुद्वीपेभ्यो ०॥मं मणिहर्म्याय ०॥
हें हेमपीठाय० ॥ धं धर्माय०॥ज्ञं ज्ञानाय०॥
वं वैराग्याय० ॥ ऐं ऐश्वर्यायनमः ॥ अं अ-
धर्माय नमः॥अं अज्ञानाय०॥अं अवैराग्या-

सं० य नमः ॥ अं अनैश्वर्याय नमः॥अं अनन्ताय मं०
१९ नमः ॥ पं पद्माय० ॥ अं द्वादशकलात्मने
सूर्यमंडलाय० ॥ ॐ षोडशकलात्मने च-
न्द्रमण्डलाय नमः॥ मं दशकलात्मने वह्निम
ण्डलाय० ॥ सं सत्वाय०॥रं रजसे नमः ॥ १९
तं तमसे नमः॥ आं आत्मने न०॥अं अन्त
रात्मने न० ॥ पं परमात्मने० ॥ ह्रीं ज्ञाना-

त्मने ०॥मं मायातत्वाय ०॥कं कलातत्वाय ०॥
विद्यातत्वाय नमः ॥ परतत्वाय नमः ॥
इति सम्पूज्य ॥ ततो विमलायै नमः ॥
उत्कर्षिण्यै० ॥ ज्ञानायै० ॥ क्रियायै नमः ॥
योगायै०॥प्रह्वै नमः ॥ सत्यायै० ॥ ईशाना-
यै० ॥ अनुग्रहायै० ॥ नमो भगवते विष्णवे
सर्वभूतात्मसंयोगयोगपद्मपीठात्मने नमः॥

इति पीठपूजा कृत्वा ॥ आवाहयेत्॥मूलम्॥
 महापद्मवनान्तस्थ करुणानन्दविग्रह ॥ सर्व-
भूत प्रभो देव एह्येहि परमेश्वर ॥ इहाग-
च्छ ॥गोपीनाथाय परिवारसमेताय अस्मिन्
पीठे सांनिध्यं कुरु कुरु स्वाहा ॥ इति प्राण-
प्रतिष्ठा॥ एह्येहि देव सुभग परिवारसमन्वि-
त ॥ यावत्वां पूजयिष्यामि तावत्वं सुस्थिरो

भव ॥१॥ इति स्थिरीकरणमुद्रां प्रदर्श्य आ-
वाहनम्॥ स्थापनम्॥ सन्निधापनम्॥ सन्नि-
रोधनम्॥ सन्मुखीकरणम्॥ अवगुण्ठनम्॥
संकलीकरणम्॥ अमृतीकरणम्॥ परममृ-
तीकरणम्॥ शं शङ्खमुद्राय नमः॥ चं चक्र-
मुद्राय०॥ गं गदामुद्राय०॥ पं पद्ममुद्राय०॥
खं ताक्ष्यर्मुद्राय०नमः॥ कौं कौस्तुभमुद्राय

सं० २१

नमः॥ इति मुद्राः प्रदर्श्य॥ मूलं०॥ साङ्गाय सपरिवाराय सन्तानगोपालाय नमः इति पाद्यार्घ्यामृतेन पादयोः ॥ मूलं ॥ अर्घ्यं स्वाहेति॥ करे मूलम्॥ आचमनीयं नमः॥ इति मुखे ॥ मूलम् ॥ मधुपर्कं नमः ॥ इति हस्तयोः मूलम्॥ स्नानं नमः ॥ इति शिर-सि ॥ इदं विष्णुरितिमन्त्रतः ॥ एवं वस्त्रं

मूलेन ॥ आभरणानीति सर्वाङ्गे मूलेन ॥
यज्ञोपवीतेति ॥ यज्ञोपवीतं ॥ चन्दनम् ॥
मूलम् ॥ अक्षतान् मूलेन पुष्पाणि ॥ धूपम् ॥
अर्घजलेन सम्प्रोक्ष्य ॥ हुं फट् इति अभ्य-
र्च्य ॥ घण्टां वादयेत् ॥ वनस्पति० धूपं
स० ॥ दीपपात्रं पुरतो धृत्वा वस्त्रेण स-
म्प्रोक्ष्य ॥ ॐ ह्रीं इति प्रज्वाल्य ॥ ज्वाला-

सं० मालिनि हुं फट् स्वाहेति अभ्यर्च्य ॥ चक्र- मं०
२२ मुद्रां प्रदर्श्य ॥ साज्यं त्रिवर्ति० ॥ मूलेन
दीपं समर्पयामि ॥ नैवेद्यं मूलेन मुखे ॥
आचमनीयं नमः मुखे ॥ ताम्बूलं नमः
इति मुखे ॥ नमस्क्रियां समर्पयामि ॥
इत्यभ्यर्च्य ॥ छत्रचामराद्युपचारांश्च सम- २२
र्प्य ॥ देवस्य षडङ्गं सम्पूज्य ॥ आज्ञां

गृहीत्वा आवरणपूजां कुर्यात् ॥ मूलेन त्रिः सम्पूज्य ॥ षडङ्गचक्राय नमः ॥ इति पुष्पाञ्जलिं दत्वा पूजयेत् ॥ मध्ये ॐ श्रीसन्तानगोपालाय नमः॥ ततोऽष्टदले पूर्वादि॥ ॐ रुक्मिण्यै नमः ॥ ॐ सत्यभामायै० ॥ ॐ जाम्बवत्यै नमः ॥ ॐ नाग्निजित्यै० ॥ ॐ कालिंद्यै० ॥ ॐ मित्रविन्दायै० ॥ ॐ

सं० लक्ष्मणायै० ॥ ॐ चारुहासिन्यै० ॥ पुष्पा- मं०
२३ ञ्जलिम् ॥ अभीष्ट० तृतीयावरणे ॥ ॐ
वसुदेवाय नमः ॥ ॐ देवक्यै०॥ ॐ नन्दा-
य० ॥ ॐ यशोदायै० ॐ बलभद्राय ॐ
सुभद्रायै०॥ॐ गोपेभ्यो०॥ ॐ गोपीभ्यो०॥
ॐ रोहिण्यै० ॥ ॐ यादवेभ्यो० ॥ पुष्पां० २३
अभी० ॥ बहिः चतुरस्रे ॥ ईशानादि ॥ ॐ

ऐश्वर्याय० ॥ ॐ अवैराग्याय० ॥ ॐ वैरा-
ग्याय नमः ॥ ॐ अनैश्वर्याय०॥ ॐ ज्ञाना-
य० ॥ ॐ अधर्माय० ॥ ॐ धर्माय० ॥ ॐ
अज्ञानाय०॥ पुष्पां०अभी० ॥ दश दिक्पा-
लान् पूजयेत् ॥ आयुधानि पूजयेत् ॥ वाह-
नानि पूजयेत् ॥ ततो ग्रहान् पूजयेत् ॥ इ-
दमत्र चन्दनं च पुष्पाणि ॥ धूपदीपफला-

सं० घैर्नैवेद्यारार्त्तिकं दक्षिणानमस्कारस्तुतिपा- मं०
२४ ठाः ॥ सुप्रोक्षितादितिलकमन्त्राणि ॥ आशी-
र्वादः ॥ अद्य पूर्वोक्ततिथौ० ॥ ततः ॥ पुत्र-
हीनस्य योगानां प्रथमं ग्रहपूजनम् ॥ त-
त्पश्चादच्युतं दुर्गां यथोक्तं तु समारभेत् ॥
एवमभ्यर्च्य देवेशं लक्षमात्रं मनुं जपेत् ॥ २४
पुत्र जीव चिरायुषं ॥ जातिबीजपूरं हुनेत् ॥

कल्पोक्ता च कृते संख्या त्रेतायां द्विगुणा स्मृता ॥ द्वापरे त्रिगुणा प्रोक्ता कलौ सङ्ख्या चतुर्गुणा ॥ १ ॥ इति प्रयोगविधिः ॥ अनन्तरं दशांशेन तर्पणादि कुर्यात् ॥ य एवं प्रजपेन्मन्त्री सन्तानाख्यं महामनुम् ॥ पुत्रैः पौत्रैर्विनन्देत तदन्ते परमं व्रजेत् ॥ अविच्छिन्नो भवेद्वंशो यावदाभूतसंप्लवम् ॥ दश-

सं० म्या शुक्लपक्षे तु निशीथे स्वस्तिमण्डले ॥ मं०

२५ हरिमावाह्य विधिवत् पूजयेदुपचारकैः ॥

एवमर्चनमात्रेण वत्सरात् पुत्रवान् भवेत् ॥

दीर्घायुरप्रतिहतबलवीर्यसमन्वितः ॥ वत्स-

राल्लभते पुत्रं सत्यं सत्यं मयोदितम् ॥ यस्या-

र्थे कुरुते मन्त्री प्रयोगः स तु पुत्रवान् ॥ व- २५

न्ध्यापि लभते पुत्रान् शतहायनजीविता-

नू ॥ प्रातर्वाचंयमा नारी बोधिद्रुमदले ज-
लम् ॥ मन्त्रयित्वान्तरशतं पिबेत्पुत्रवती
ध्रुवम् ॥ एवं प्रयोगे मासमात्रात्तनयं लभते
ध्रुवम् ॥ अनेन मन्त्रितं वाच्यं पुत्रसिद्धिक-
रं परम् ॥ अनेन जलपानेन वंध्या वर्षाल्ल-
भेत्प्रजाम् ॥ पयोव्रतमेकलक्षं शाकेन द्विगु-
णं स्मृतम् ॥ भैक्षान्ने त्रिगुणं प्रोक्तं हविष्या-

स० न्ने चतुर्गुणम् ॥ पश्चात् होमः ॥ पायसान्नेन मं०
२६ उक्तः ॥ गुग्गुलुतिलयवव्रीहिबिल्वपत्रदू-
र्वाकणवीरघृतशर्करानारिकेलमज्जाखर्जूर-
द्राक्षासर्षपार्कपुष्पश्रीफलादिनानाविधफलै-
र्जुहुयात् ॥ ब्राह्मणभोजनं ॥ दक्षिणासं-
कल्पः ॥ कुमारिकाभोजनम् ॥ बटुकभोजन- २६
म् ॥ पुरश्चरणं चतुर्लक्षं ॥ तद्दशांशेन होमः ॥

नित्यं पयसा तर्पणम् १०८। ततो जपसहस्र-
करणम् ॥ तस्य संकल्पमन्त्रः ॥ गुह्यातिगु-
ह्यगोप्ता त्वं गृहाणाऽस्मत्कृतं जपम् ॥ सि-
द्धिर्भवतु मे देव त्वत्प्रसादात् त्वयि स्थिता ॥
॥ १ ॥ पश्चात्प्रयोगार्थे जपः कार्यः ॥ इति
गौतमीये तन्त्रे सन्तानगोपालमन्त्रपद्धतिः
समाप्ता ॥ ॥ ॥

सं० ॥ अथाधिकारिभेदेन जपप्रकारः ॥ ज०
२७ ॥ ॐ ह्रीं ज्रीं क्लीं भूर्भुवः स्वः देवकीसुत
गोविंद वासुदेव जगत्पते ॥ देहिमे तनयं
कृष्ण त्वामहं शरणं गतः भूर्भुवः स्वः क्लीं
श्रीं ज्रीं ह्रीं ॐ ॥ १ ॥ एवं ब्राह्मणेन
जपः कार्यः ॥ क्षत्रियेण लं देवकीसुत० ॥ २७
वैश्येन श्रीं देवकीसु० ॥ शूद्रेण ह्रीं देवकी

सु० ॥ स्त्रिया क्लीं देवकीसु० ॥ इत्यधिकारि-
भेदेन जपप्रकारः ॥ श्रीरस्तु ॥ शुभं भवतु ॥

॥ अथ श्रीगोपालकवचं प्रारभ्यते ॥

श्रीमद्गोपीजनवल्लभाय नमः ॥ श्रीमदाचार्य-
चरणकमलेभ्यो नमः ॥ ॐ अस्य श्रीगोपा-
लकवचमन्त्रस्य ॥ नारदऋषिः ॥ गायत्री
छन्दः ॥ श्रीमदनगोपालो देवता ॥ क्लीं

सं० बीजं ॥ कृष्णेति शक्तिः ॥ श्रीगोपालप्रीत्यर्थे क०
२८ जपे विनियोगः ॥ अथ ध्यानम् ॥ बर्हापीडा-
भिरामं मृगमदतिलकं कुण्डलाक्रान्तगण्डं
कञ्जाक्षं कम्बुकण्ठं स्मितसुभगमुखं चाधरे
न्यस्तवेणुम् ॥ शान्ताकारं त्रिभङ्गं सुरुचिर-
वसनं भूषितं वैजयन्त्या वन्दे वृन्दावनस्थं २८
युवतिगणवृतं ब्रह्मगोपालपालम् ॥ इति

ध्यानम् ॥ श्रीनारद उवाच ॥ ॐ क्लीं कृष्णाय
शिरः पातु गोविन्दाय ललाटकम् ॥ गोपिका-
वल्लभो देवो भ्रूमध्यं पातु मे सदा ॥ १ ॥ स्वाहा-
युक्तो हरिः पातु लोचने नवनीतभुक् ॥ श्रवणे
गोपिकानाथः करुणामृतविग्रहः ॥ २ ॥ नासि-
कां नीरदाभश्च भ्रुवमानन्दमोहनः ॥ गण्डौ
पुनातु वैकुण्ठः कामकेलिकलानिधिः ॥ ३ ॥

सं० ओष्ठाधरौ महात्मा च नन्दगोपसुतः प्रभुः॥ क०
२९ दन्तान्मुष्टिकजित्पायादात्मारामः परात्परः
॥४॥ मुखं मनोहरः कृष्णः पायात्कमललो-
चनः॥ कण्ठं मे गोपतिः श्रीमान् वृन्दावन-
विनोदकः॥५॥ भुजौ गजभ्रंशकश्च नर्तवेष
महोदयः ॥ वक्षःपायान्महामल्लो मल्लवान् २९
मल्लनाशनः ॥६॥ स्तनौ पायात्पूतनारी रा-

सनं गोविशारदः॥ मध्यं मनोभवानन्दः का-
लिंदीकेलिलम्पटः ॥ ७ ॥ गुह्यं पातु जग-
द्धाता जानुयुग्मं महाभुजः ॥ पादौ पुनातु
दैत्यारिः सर्वदा भक्तवत्सलः ॥ ८ ॥ कायं
गदाधरः पातु गोपिकानयनोत्सवः ॥ अधः
पातु महादेवो नारायणगुणार्णवः ॥ ९ ॥
ऊर्ध्वं गोवर्द्धनधरः पायात्सर्वभयापहः ॥ दि-

सं० वा पायाच्चक्रपाणी रात्रौ दानवमर्दनः॥१०॥ क०
२० जले स्थले चान्तरिक्षे नृसिंहः पातु मां सदा॥
य इदं कवचं दिव्यं नारदेन प्रकीर्तितम् ॥
॥११॥ पठेद्भक्तिपरो भूत्वा सम्पदस्संप्रप-
द्यते ॥ त्रिसन्ध्यं भक्तिभावेन कृष्णभक्तो
ह्यनन्यधीः ॥ १२ ॥ पठित्वा लभते नित्यं ३०

यद्यद्वाञ्छति चेतसा॥ जीवन्मुक्तो भवेत्सो-

ऽपि दृढा भक्तिर्हरौ भवेत् ॥१३॥ राजवल्लभ-
तामेति सर्वानेव वशं नयेत् ॥ १४ ॥ ॥

इति श्रीगौतमीयतन्त्रे नारदप्रोक्तं श्रीगो-
पालकवचं सम्पूर्णम् ॥



इदं पुस्तकं श्रीयुत भगीरथात्मजेन हरिप्र-
सादशर्मणां मुंबय्यां निर्णयसागराख्य-
मुद्रणयंत्रालये मुद्रयित्वा
प्रकाशितम्.

संवत् १९५६, सन १८९९.

हरिप्रसाद भगीरथजीका
पुस्तकालय
ठि॰ काळकादेवीरोड, रामवाडी
मुंबई.

॥इति संतानगोपाल विधानं॥